**22E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : डिसेंबर – २०२३**

**सत्र १ रे**

**विषयः नीतिशतक (22E415)**

**दिनांक :** १९/१२/२०२३ **गुण :**१०० **वेळ : स.** १०.०० ते १.००

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. स्वभाषया अनुवादं कुरुत (केषाश्चित् चतुर्णाम्)** (३२)

१) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम् विद्या भोगकरी यशः सुखकरी विद्या गुरुणां गुरुः।।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं विद्या राजसु पूज्यते न हि धन विद्याविहीनः पशुः।।

२) लाङ्गूलचालनमधश्चरणावपातं भमौ निपत्य वदनोदरदर्शनं च।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु धीरं विलोकयति चाटुशतैश्च भुङ्क्ते।।

३) राशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभूर्धनपरायणः सततदुर्गतः सज्जनो नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे।।

४) प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारभ्य उत्तमगुणाः न परित्यजन्ति।।

५) खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके वाञ्छन् देशमनातपं विधिवशाद् बिल्वस्य मूलं गतः।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः।।

६) गुणवदगुणवद्वाकुर्वता कार्यजातं परिणतिरवधार्या यत्नतः पण्डितेन।
अतिरभसकृतानां कर्मणाविपत्तेर् भवति हृदयदाही शल्यतुल्यो विपाकः।।

**प्र.२. ससन्दर्भं स्पष्टीकरणं कुरुत। (केषाश्चित् चतुर्णाम्)** (२४)

१) अवस्था वस्तूनि प्रथयति च संकोचयति च।
२) ज्वर इव मदो मे व्यपगतः।
३) न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।
४) यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति।
५) नानाफलैः फलति कल्पलतेव भूमिः।
६) न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।

**प्र.३. पद्धतिद्वयं सोदाहरणं लिखत।** (३०)

**१)** मूर्खपद्धतिः
**२)** मानशौर्यपद्धतिः
**३)** सुजनपद्धतिः
**४)** दैवपद्धतिः

**प्र.४. नीतिशतककारस्य कालं ग्रन्थकर्तृत्वं लेखनकौशल्यं च अधिकृत्य निबन्धः लेख्यः।** (१४)

----------